ॐ

कतिषु लिपिषु संस्कृतं लिख्यते ?

विद्वान् श्रीरमणशर्मा,

काञ्चीशङ्करमठः, नॆरूर् अग्रहारः, द्रविडदेशः

संस्कृतं विश्वभाषा इति वयं सर्वे साभिमानं वदामः । परन्तु अस्मिन् काले भाषा नाम लिपिं विना प्रायो नास्ति । कस्याश्चन भाषायाः स्वीया अनितरभाषासाधारणा लिपिः नास्ति चेद् अपि, अवश्यं कयाचित् लिप्या सा लिख्यते एव प्रायेण । तत्तर्हि विश्वभाषात्वेन प्रख्यातिं गता संस्कृतभाषा कस्यां लिप्यां, न हि न हि, कतिषु लिपिषु लिख्यते ? यदि सा विश्वभाषा, नूनं सा सुबहुभिः लिपिभिः लिख्येत ! सत्यमेव । भारतीयासु प्रसिद्धासु लोकव्यवहारास्पदभूतासु देवनागरी-गुर्जर-वङ्ग-उत्कल-आन्ध्र-कर्णाटक-केरल-लिपिषु द्रविडदेशे च ग्रन्थलिप्यां संस्कृतं लिख्यते । बहूनि च वेद-शास्त्र-स्तोत्रादि-पुस्तकानि संस्कृतभाषायामेव निबद्धानि तासु लिपिषु वर्तन्ते । इदं च सर्वे वयं भारतीयाः जानीमः एव । परन्तु सन्ति अन्याः अपि भारतदेशात् बहिर्भूतेषु प्रदेशेषु उपयुज्यमानाः लिपयः याभिः संस्कृतं लेखितुं शक्यम् ।

ऋ ॠ ऌ इत्येते, तन्त्रशास्त्रगोचरः ऌवर्णः, अनुस्वारः विसर्गः च इत्येते वर्णाः संस्कृते एव वर्तन्ते, भाषान्तरेषु च स्वभावतो न भवन्ति । सन्ति चेदपि संस्कृतादेव आगताः भवन्ति । इमे वर्णाः याभिः लिपिभिः लेखितुं शक्याः ताभिः निश्चयेन अ आ इ ई उ ऊ इत्यादयः सामान्याः वर्णाः अपि निश्चयेन लेखितुं शक्याः एव भवन्ति । तादृश्यश्च लिपयः संस्कृतोपयोगिन्यो भवन्ति । तादृशसंस्कृतोपयोगिलिपिविषये इह लेखने यथामति विलिख्यते ।

मम ज्ञानं निश्चयेन परिमितम् । अतः कृतेऽपि दोषशोधनप्रयत्ने स्युः केऽपि दोषाः अत्र लेखने । तद्यदि तादृशं विद्यते, कृपया तद्विषयज्ञाः प्रमाणपूर्वकं विनिवेदयन्तु, दोषे सति च स्वीयं ज्ञानं परिष्करिष्यामि इति अभ्यर्थये ॥

प्रसङ्गात् लिपिभाषयोः अभेदाध्यासस्य उद्धारः

तत्र देवनागरी लिपिः राष्ट्रिये अन्ताराष्ट्रिये च स्तरे संस्कृतस्य लेखनाय अतीव प्रभूततया उपयुज्यते । तेन च भारतेऽपि बहवः भ्रान्त्या देवनागरीलिपिरेव "संस्कृतलिपिः" इति चिन्तयन्ति । "इदं संस्कृतवेदपुस्तकं, तत् कन्नडवेदपुस्तकम्" इत्यादिरूपं च शब्दप्रयोगम् अतीव विचित्रं कुर्वन्ति । वेदो हि संस्कृते (संस्कृतभाषायाम्) एव सर्वदा वर्तते । तर्हि सर्वं खलु वेदपुस्तकं संस्कृते अस्ति । तदा को विशेषः "संस्कृत"वेदपुस्तकस्य "कन्नड"वेदपुस्तकात् ? कश्च तावद् अर्थः "कन्नडवेदपुस्तक"शब्दस्य ? यदि कन्नडलिप्यां मुद्रितं वेदपुस्तकं, तर्हि खलु देवनागरीलिप्यां मुद्रितं वेदपुस्तकम् इत्यर्थे "देवनागरीवेदपुस्तकम्" इत्येव वक्तव्यम् । "संस्कृतवेदपुस्तकम्" इति तु भ्रान्तो व्यवहारो लोके दृश्यते परिहर्तव्यश्च ।

आचार्यशङ्करभगवत्पादैः ब्रह्मसूत्रभाष्ये "सत्यानृते मिथुनीकृत्य नैसर्गिकोऽयं लोकव्यवहारः" इति यथा कथितं तथा भाषायाश्च लिपेश्च मिथः अभेदाध्यासं कृत्वा बहुभिः बहुधा व्यवह्रियते । इदं च बहूनाम् अन्येषामपि भाषातत्त्वज्ञान-

प्रतिबन्धकानां भ्रमाणाम् आस्पदं वर्तते । या भाष्यते सा भाषा शब्दसमुदायरूपा । या लिख्यते सा लिपिः रेखासमुदायरूपा । लिख्यमाना लिपिः भाष्यमाणां भाषां सूचयत्येव केवलं, न तु लिपिरेव भाषा ।

पूर्वं पठधातुः शब्दोच्चारणरूपे अर्थे प्रयुज्यमानः आसीत् । ततश्च श्लोकं पठति इत्यस्य श्लोकं व्याहरति इत्यर्थः (आसीत्) । अधुना तु लिखितस्य श्लोकस्य चक्षुषा अवलोकनम् अवधारणं च श्लोकस्य पठनमिति प्रसिद्धं जातम् । इदमपि लिपिभाषयोः परस्पराभेदाध्यासवशादेव । "'क' इत्यत्र कति वर्णाः" इति पृष्टः सामान्यो जनः, ककारः अकारः इति द्वौ विद्येते इत्येतद् अननुसन्धाय, लिख्यमानस्य एकत्वं मत्वा "एकः" इति अयथाभूतम् उत्तरं वदति । एतादृशाः बहवः सन्ति अनर्थाः लिपिभाषयोः परस्पराभेदाध्यासनिबन्धनाः ।

यदि च परस्परेण अव्यभिचारो भवेत् कयोश्चिद् लिपिभाषयोः, तर्हि कथञ्चित् अयम् अध्यासः समूलः इति वक्तुं शक्यते । तथा हि सन्ति लिपयः काश्चिद् यासु एका एव भाषा लिख्यते । यथा द्रविड(तमिल)लिपिः, यस्यां द्रविडभाषा एकैव लिख्यते नान्या । (तस्यां लिप्यां स्वभावतः महाप्राणादिसूचकानां चिह्नानाम् अभावात् संस्कृतप्रतिपादनसामर्थ्यं नास्तीति सर्वे जानन्त्येव । कर्णाटकादिलिपिषु तु कर्णाटकादिभाषाः विहाय संस्कृतमपि लेखितुं शक्यम् इत्यतः ताः परिहाय द्रविडेत्युक्तम् ।) इत्थं सर्वयोः लिपिभाषयोः परस्पराव्यभिचारे सति सर्वत्र अभेदाध्यासः उपपद्येतापि ।

परन्तु एकैव देवनागरीलिपिः संस्कृत-हिन्दी-मराठी-नेपाली-काश्मीरी-सिन्धी-प्रभृतीनां बह्वीनां भाषाणां लेखनाय उपयुज्यते । तथैव एकैव 'आङ्ग्ललिपिः' इत्यस्माभिः उच्यमाना 'रोमन्'लिपिः (अथवा 'लत्तीन्'लिपिः) आङ्ग्ल-फ्रेञ्च्-जर्मन्-प्रभृतीः बह्वीः भाषाः लेखितुम् उपयुज्यते । वैपरीत्येन च एकैव काश्मीरभाषा देवनागरी-अरबी-लिपिभ्यां द्वाभ्यां लिख्यते । सिन्धीभाषाऽपि तथैव । एवं सति सुतरां दृश्यते लिपिभाषयोः परस्परव्यभिचारः ।

तस्माद् लिपिं च भाषां च परस्परस्माद् विविच्य जानीयाम । भाषातत्त्वज्ञाने अयमेव मार्गः ॥

संस्कृतोपयोगिन्यो भारतीया लिपयः

प्रकृते उक्तरीत्या लोकव्यवहारे प्रसिद्धतया संस्कृतभिन्नानामपि भाषाणां लेखनाय उपयुज्यमानाः देवनागरी-गुर्जर-वङ्ग-उत्कल-आन्ध्र-कर्णाटक-केरल-लिपयः संस्कृतलेखने उपयुज्यन्ते । सर्वास्वेतासु लिपिषु अनुस्वारविसर्गचिह्ने, ऋॠऌॡ इत्येषां वर्णानां चिह्नानि, महाप्राणादिचिह्नानि च पृथक्पृथग् विद्यन्ते ।

द्रविडलिपिस्तु उक्तरीत्या उक्तवर्णसूचकचिह्नराहित्यात् संस्कृतलेखनाय न प्रभवति । परन्तु अस्ति अन्या लिपिः द्रविडदेशे ग्रन्थलिप्याख्या । एषा द्रविडलिपेः सोदरी, संस्कृतलेखनसमर्था च । अन्ये पुनः द्रविडलिपिस्थेष्वेव व्यञ्जनादिचिह्नेषु द्वित्र्याद्यङ्कादीनि चिह्नानि क[२] क[३] इति निक्षिप्य तां संस्कृतसमर्थां कुर्वन्ति ।

पञ्चापदेशभाषालेखनाय उपयुक्ता प्रसिद्धा गुर्मुखीलिपिस्तु महाप्राणादिचिह्नसत्त्वेऽपि ऋकाराद्यभावात् संस्कृतशक्तिमती नेति भाति । (यद्वा द्रविडलिप्यामिव स्यात् किञ्च तन्त्रं तत्रापि, यन्मया न ज्ञातम् ।)

अन्याश्च अप्रसिद्धतराः (केषांचनैव जनानां प्रसिद्धाः) लिपयः सन्ति भारते एव अद्यापि उपयुज्यमानाः संस्कृतसमर्थाः । उक्ता द्रविडदेशीया ग्रन्थलिपिः तादृशी एका । सौराष्ट्रदेशाद् बहुभ्यो वर्षशतकेभ्यः पूर्वम् आगत्य

द्रविडेषु वसद्भिः जनैः उपयुज्यमानायां सौराष्ट्रलिप्यामपि सर्वाणि संस्कृतापेक्षितानि चिह्नानि वर्तन्ते । विहारदेशे कैश्चिद् उपयुज्यमानायां तिरहुत-अपरनाम्न्यां मैथिलीलिप्यामपि तथा वर्तन्ते । एवं महाराष्ट्रेषु पूर्वं प्रयुक्तायां मोडिलिप्यामपि ।

अत्रायं प्रश्नो भवति । एतासु लिपिषु तानि चिह्नानि वर्तन्ते इति तावन्मात्रेण तासु संस्कृतं लिख्यते इति कथं वक्तुं शक्यते ? उच्यते । यद्यपि मया प्रत्यक्षतः सर्वास्वेतासु लिपिषु लिखितानि मुद्रितानि वा संस्कृतपुस्तकानि न दृष्टानि । अथापि एतेषु ऋकारादीनि चिह्नानि वर्तन्ते इत्यनेनैव ज्ञायते यद् एताभिः लिपिभिः कदाचिद् क्वचिद् वा अवश्यं संस्कृतं लिखितं भवेद् । अन्यथा खलु व्यर्थानि स्युः एतानि चिह्नानि । तथाहि – ऋकारः ऋष्यादिशब्देषु प्रसिद्धतरेषु भाषान्तरेष्वपि प्रयुज्यते इति वक्तुं शक्येत । परन्तु दीर्घस्य ॠकारस्य ऌकारयोश्च चिह्नानां संस्कृतम् अन्तरा सर्वथा अनुपयोग एव । तत्रापि ऌकारस्य (तच्चिह्नस्य च) संस्कृतगामिषु तन्त्रपुस्तकेष्वेव दर्शनात् सुतरां वक्तुं शक्यं यद् एताभिः लिपिभिः अवश्यं संस्कृतं लिखितं भवेत् इति ।

अथ विशेषतः काश्मीरेषु वर्तते शारदाख्या लिपिः या संस्कृतलेखने नितरां समर्था । शारदालिप्यां काश्मीरपण्डिताः अद्यत्वेऽपि पूजादिपद्धतिसम्बद्धान् विषयान् जातकादींश्च लिखन्ति । बहूनां संस्कृतग्रन्थानां सुबहूनि तालपत्राणि शारदालिप्यां वर्तन्ते । तेषां तालपत्राणां पठनसामर्थ्यप्राप्तये तालपत्रगतानां ग्रन्थानां लोके प्रकाशनाय च अद्यत्वे संशोधनसंस्थाः शारदालिपेः अभ्यासम् अपि कारयन्ति ।

पुनश्च अन्या एका अस्ति लिपिः या वस्तुतः उत्तरभारतीया, सहस्राद् वर्षेभ्यः पूर्वं तत्र उपयुक्ता, अद्यत्वे परं तत्र अनुपयुज्यमाना, बौद्धभिक्षुभिः चीन-कोरिया-जपान्-प्रभृतिषु देशेषु नीता, तत्र सर्वत्र अद्यापि ईषद्-ईषत्-चिह्नभेदेन बौद्धसम्प्रदायसम्बन्धिनां संस्कृतग्रन्थानां संस्कृतमन्त्राणां च लेखनाय उपयुज्यमाना । अस्याश्च लिपेः "सिद्धम्" इति (सिद्धमातृका इति वा) अतीव मङ्गलं नामधेयं वर्तते । संस्कृतमिति शब्दस्य "परिष्कृतम्" इति यः अर्थः स एव अर्थः अस्य शब्दस्यापि । परिष्कृतायाः भाषायाः लेखनाय उपयुक्ता परिष्कृता अतीव शक्तिमती लिपिः इति च महता गौरवेण इयं चीनादिदेशगतैः बौद्धसम्प्रदायस्थैः विभाव्यते । अद्यत्वेऽपि जपान्-प्रभृतिषु देशेषु बौद्धदेवालयेषु पूजायाम् "सिद्ध"लिपिनिबद्धेभ्यः पत्रादिभ्यः संस्कृतमन्त्रान् पठन्ति तत्रत्याः पुरोहिताः । (भारते परं हिन्दुदेवालयेषु संस्कृतेन अर्चनादिकं न कर्तव्यम् इति केचित् संस्कृतद्वेषिणः प्रचारयन्ति इति तु शोकास्पदमेव ।)

नेपालदेशे रञ्जनाख्या लिपिः बौद्धमठालयेषु संस्कृतलेखनाय उपयुज्यते । अद्यत्वे अनुपयुज्यमानाश्च ब्राह्मी-खरोष्ठी-प्रभृतयो लिपयः संस्कृतलेखनाय बहोः कालात् पूर्वम् उपयुक्ताः इति तु पुरावृत्तकौतुकिनो जानन्त्येव ।

एतासु अद्यानुपयुक्तासु लिपिषु विशेषवक्तव्यताम् अर्हति पल्लवलिपिः । इयं लिपिः दक्षिणभारते ब्राह्मीलिपेः विपरिणामेन जाता, अद्यतन्याः द्राविड-ग्रन्थ-केरललिपीनां मूलभूता । अन्याः आन्ध्र-कर्णाटक-द्रविडादिलिपयोऽपि अनया लिप्या प्रभाविताः आसन् । एषा पल्लवराजानां काले प्राच्यां दिशि कम्बोजप्रभृतिषु देशेषु गता वक्ष्यमाणानां थाय-कम्बोज-प्रभृतीनां लिपीनाम् उत्पत्तौ मूलभूता अभवत् । अस्याः लिपेः उपयोगः अतीव व्यापकः भारते भारताद् अन्यत्र च आसीत् । उक्तरीत्या च सुबह्वीनाम् अधुनातनीनां लिपीनां मूलभूता इयम् इति अस्याः विशेषः ।

भारताद् अन्यत्र संस्कृतोपयोगिन्यो लिपयः

भारतस्य अतिनिकटवर्तिनि, अथ च दक्षिणभारतीयेन, विशिष्य द्रविडदेशीयेन इतिहासेन अतीव सम्बद्धे श्रीलङ्कादेशे सिंहलाख्या लिपिः उपयुज्यते । सा च सिंहलभाषां द्रविडभाषां चेव संस्कृतभाषामपि प्रतिपादयितुं शक्नोति, ऋॠऌॡकारादींश्च वर्णान् बिभर्ति । तत्रापि बौद्धग्रन्थानां लेखने संस्कृतस्य उपयोगो वर्तते किल । (एतावतैव पठितृभिः ज्ञातं स्याद् यद् यत्रयत्र भारतादन्यत्र बौद्धमतस्य प्रचारः अभवत् तत्र सर्वत्र संस्कृते निबद्धाः बौद्धग्रन्थाः मन्त्राश्च लेखनीयाः जाताः इत्यतः तत्रत्या लिपयः संस्कृतलेखनसमर्थाः जाताः । इदं च उत्तरत्र भूयोऽपि द्रक्ष्यते ।)

भारतात् पूर्वस्यां दक्षिणपूर्वस्यां वा दिशि गच्छामश्चेत् तत्रापि बहुत्र संस्कृतसमर्थाः लिपयो दृश्यन्ते । ब्रह्म(बर्म)देशस्य म्यान्मार्-नाम्नी लिपिः, थायदेशस्य थायलिपिः, कम्बोज(कम्बोडिया)देशस्य ख्मेर्-नाम्नी लिपिश्च संस्कृतसमर्थाः सन्ति, तत्र च संस्कृतनिबद्धानां बौद्धग्रन्थानां लेखनाय उपयुक्ताः ।

इन्दोनेशियान्तर्भूते बलिद्वीपे भारतीयसनातनसम्प्रदायः (हिन्दुमतम्) अधुनाऽपि दृढं वर्तते । हिन्दुजनानाम् एव तत्र भूयिष्ठत्वं च वर्तते । अतः तत्रोपयुज्यमानायां बलिलिप्यामपि संस्कृतलेखनसामर्थ्यं पूर्णं वर्तते । विशेषतश्च इदं वक्तव्यं यत् तैः स्वीयायाः बलिभाषायाः अध्यापनवेलायाम् अध्येतृभ्यः अल्पप्राण-महाप्राणादि-परिभाषा कण्ठ्य-तालव्य-मूर्धन्य-दन्त्य-ओष्ठ्यादि-परिभाषा ऊष्म-अनुस्वार-विसर्गादि-शब्दाः च बोध्यन्ते ! (सिंहल-भाषायामपि इत्थमेव कण्ठ्यादिशब्दप्रयोगः अल्पप्राण-महाप्राण-व्यवहारश्च दृढो वर्तते ।) इत्थं बलिद्वीपनिकटे यावक(जावा)द्वीपेऽपि वर्तते ।

भारताद् उत्तरतः परिशील्यमाने त्रैविष्टपलिपिः विशेषतो गणनीया भवति । (त्रिविष्टपशब्द एव थिबेट्-शब्दो जात इति वदन्ति वृद्धाः, अतः तत्रत्या लिपिः त्रैविष्टपलिपिः इत्युक्ता ।) त्रैविष्टपलिप्यां न केवलं संस्कृतलेखनसामर्थ्यं वर्तते, प्रत्युत सुबहवः बौद्धाः संस्कृतग्रन्थाः तस्यां लिप्यां लिखिताः वर्तन्ते । अस्यां लिप्यां भारतीयलिपीनां चीनलिपेश्चेति उभयसादृश्यं दृश्यते । मङ्गोलियादेशे उपयुक्ता फाग्स्-पा-लिपिः एकेन फाग्स्-पा-लामा-नाम्ना बौद्धपूज्यगुरुणा प्रवर्तिता उपरिष्टाद् अधोऽभिमुखं लिख्यमाना अपि संस्कृतोपयुक्ता । चीन-कोरिया-जपान्-देशेषु च भारतीया एव सिद्धमातृकालिपिः नीता उपयुज्यते बौद्धालयेषु इति च उक्तमेव ।

अन्ते च लोकप्रसिद्धाम् आङ्ग्लादिभाषोपयुक्तां च रोमन्-लिपिम् उपयुज्यापि बिन्द्वादिचिह्नं संयोज्य संस्कृतं लिख्यते एव अन्ताराष्ट्रियस्तरे देवनागर्याद्यनभिज्ञैः संस्कृतजिज्ञासुभिः ।

उपसंहारः

अस्मिन् लेखने उल्लिखिताः सर्वाः लिपयः खरोष्ठी-फाग्स्-पा-वर्जं वामतो दक्षिणाभिमुखं लिख्यन्ते । खरोष्ठी परं दक्षिणतो वामाभिमुखं लिख्यते । फाग्स्-पा-लिपिश्च उपरिष्टाद् अधोऽभिमुखं लिख्यते इत्युक्तमेव ।

आसु लिपिषु द्वे स्तो लिपी संस्कृतैकशरणे अन्यस्याः भाषायाः लेखनाय सर्वथा अनुपयुक्ते । ते च द्रविडदेशीया ग्रन्थलिपिः, चीनादिदेशस्था "सिद्धं"लिपिश्चैव । यद्यपि ग्रन्थलिपेः पुरातनं किञ्चिद् रूपं केरलेषु केरलभाषालेखनाय उपयुक्तम् अद्यत्वे केरललिपिताम् आपन्नम् । तया च दृष्ट्या ग्रन्थलिप्या केरलभाषा पूर्वं लिखिता इति वक्तुं शक्येत ।

तथाऽपि सर्वत्र लिपिविकासे इदं सहजमेवेति अद्यतन्याः ग्रन्थलिपेः संस्कृतभिन्नायां भाषायाम् अनुपयोगाद् एवमुक्तम् । अनया दृष्ट्या काश्मीरीया शारदालिपिरपि संस्कृतैकविषया इति वक्तुं शक्यते । पूर्वं काश्मीरभाषालेखनायापि सा उपयुक्ता आसीत् । परन्तु पश्चात् उर्दुप्रभावेण काश्मीरभाषया नूतनतया स्वीकृतानां वर्णानां प्रतिपादने तस्याः अपर्याप्तत्वात् तस्याः काश्मीरभाषालेखने उपयोगो विरतः । अतः अन्ते साऽपि संस्कृतैकगोचरा जाता ।

इदं चेह वक्तव्यम् । सर्वास्वेतासु लिपिषु संस्कृतं लिखितमस्तीति अस्माभिः कुतश्चित् प्रमाणाद् अवगतम् इत्यतः इमाः अत्र परिपठिताः । परन्तु भारतीयासु लिपिषु यानि वर्णचिह्नानि यथा वर्तन्ते, तन्नाम यया आनुपूर्व्या वर्तन्ते, यादृशो वा तेषां संयोगादिस्वभावो वर्तते, तथैव सर्वास्वपि लिपिषु भवतीति नार्थः । पूर्वोक्तरीत्या, क्वचित् तासां लिपीनां चिह्नसम्पदः परिमितत्वात् पृथक्पृथग् एकैकस्य संस्कृतवर्णस्य एकैकं चिह्नं नास्ति चेदपि तत्र किमपि लेखनतन्त्रम् उपयुज्य विद्यमानैरेव चिह्नैः असन्देहेन संस्कृतलेखनं साधयन्ति तत्तल्लिपिप्रयोक्तारः ।

इतोऽपि भवन्त्येव बह्व्यो लिपयः अप्रसिद्धतराः (यद्वा मया न ज्ञाताः) यासु संस्कृतलेखनसामर्थ्यं विद्यते । अपि च संस्कृतभाषा वस्तुतः लिपिनिरपेक्षा, यतः सा अनादिवेदमूलिका । आङ्ग्लादिभाषास्विव संस्कृते लिखितरूपसापेक्षता नास्ति, उच्चारणमात्रेण च अर्थप्रतिपत्तिः भवति । (अयं च स्वभावः संस्कृतजन्यासु अन्यासु भारतीयभाषास्वपि प्रायेण दृश्यते ।) इदं चैव संस्कृतस्य लिपिनिरपेक्षत्वं संस्कृतस्य एतावतीषु लिपिषु लिखितत्वे लिख्यमानत्वे च हेतुः । सर्वथा एतावतीषु लिपिषु संस्कृतस्य लेखनं संस्कृतस्य विश्वभाषात्वमेव द्रढयति इति संस्कृताभिवृद्धेः मङ्गलम् आशासीमहि ॥

संस्कृतोपयुक्तलिप्यावलिः

१) देवनागरी-लिपिः	८) ग्रन्थ-	१५) रञ्जना-	२२) ख्मेर्-
२) गुर्जर-	९) द्राविड-	१६) ब्राह्मी-	२३) बलि-
३) वङ्ग-	१०) सौराष्ट्र-	१७) खरोष्ठी-	२४) त्रैविष्टप-(थिबेट्-)
४) उत्कल-	११) मैथिल-	१८) पल्लव-	२५) फाग्स्-पा-
५) आन्ध्र-	१२) मोडि-	१९) सिंहल-	२६) रोमन्-
६) कर्णाटक-	१३) शारदा-	२०) म्यान्मार्-	२७) अन्याः अपि...
७) केरल-	१४) सिद्ध-	२१) थाय-	

विषयाधाराः

इमे विषयाः Unicode (http://unicode.org/charts/) Wikipedia (http://en.wikipedia.org/) Omniglot (http://omniglot.com/) इत्यादिभ्यः जालस्थलेभ्यः सङ्गृहीताः । लिखितोदाहरणानां सङ्कलने च जर्मन्-देशीयः एल्मार्-क्रिप्राथ्-महोदयः, आस्त्रेलिया-देशीयः इयान्-जेम्स्-महोदयः, अमेरिका-वासी अंशुमान् पाण्डेयः, चेन्नपुरीवासी विनोद्-राजन् च सहाकुर्वन् । सर्वेषु एषु कृतज्ञतां व्याहरामि ॥

१)	देवनागरी	माम् एकं शरणं व्रज ।
२)	गुर्जर	મામ્ એકં શરણં વ્રજ ।
३)	वङ्ग	মাম্ একং শরণং ব্রজ ।
४)	उत्कल	ମାମ୍ ଏକଂ ଶରଣଂ ବ୍ରଜ ।
५)	आन्ध्र	మామ్ ఏకం శరణం వ్రజ ।
६)	कर्णाटक	ಮಾಮ್ ಏಕಂ ಶರಣಂ ವ್ರಜ ।
७)	केरल	മാമ് ഏകം ശരണം വ്രജ ।
८)	ग्रन्थ	𑌮𑌾𑌮𑍍 𑌏𑌕𑌂 𑌶𑌰𑌣𑌂 𑌵𑍍𑌰𑌜 ।
९)	अङ्कयुत-द्राविड	மாம் ஏகம்' ஶரணம்' வ்ரஜ ।
१०)	सौराष्ट्र	ꢩꢵꢬ꣄ ꢡꢵꢂ ꢪꢵꢤꢂ ꢬꢵꢡ ।
१३)	शारदा	𑆨𑆸𑆩𑆺 𑆥𑆷𑆫𑆺 𑆩𑆸𑆭𑆺𑆫𑆺 𑆮𑆷𑆛𑆺 ।
१५)	रञ्जना	𑑝𑑦𑑩 𑑟𑑤𑑩 𑑭𑑟𑑩𑑩 𑑮𑑤𑑛𑑩 ।
१६)	ब्राह्मी	𑀫𑀸𑀫𑁍 𑀏𑀓𑀁 𑀶𑀭𑀡𑀁 𑀩𑁆𑀭𑀜 ।
१८)	सिंहल	මාමි එකං ශරණං ව්‍රජ ।
१९)	ब्रह्मदेश (म्यान्मार्)	မာမ် ဧကံ ၁ရဏံ ဝြဇ ।
२०)	थाय	มามฺ เอกํ ศรณํ วฺรช ฯ
२१)	कम्बोज	មាម៑ ឯកំ ឝរណំ ព្រជ ។
२२)	बलिद्वीप	[illegible] ।
२३)	त्रैविष्टप	སྨས་ཅེག་ཤར་ཎཾ་གྲོ་།
२५)	बिन्द्वादियुत-रोमन्	māṁ ekaṃ śaraṇaṃ vraja ।

अथ बुद्धसम्प्रदायप्रभावितेषु देशेषु प्रसिद्धः ॐ मणिपद्मे हुं इति बौद्धमतीयसंस्कृतमन्त्रः लिख्यते –

१४)	सिद्धमातृका	𑖌𑖼𑖟𑖨𑖮𑖿𑖩𑖽
२४)	फाग्स्-पा	→ ཨོཾ་མ་ཎི་པད་মে་ཧཱུཾ

थायदेशे पल्लवलिपिनिबद्धं सुन्दरसंस्कृतश्लोकात्मकं शिलाशासनम् –



यश्श्रीमहेन्द्रवर्मेतिमहेन्द्रइवविश्रुतः । सशङ्करतडाकाख्यञ्चखानेमञ्जलाशयम् ॥

इतोऽपि स्पष्टतया लेथने: यः श्रीमहेन्द्रवर्मेति महेन्द्र इव विश्रुतः । स शङ्करतटाकाख्यं चखानेमं जलाशयम् ॥

(विसर्गस्तु शासने च्युतः ।)

-*-*-*-